## ॥ गणनाथामृताननद लघु पाद पूजाम् ॥

ॐ ॐ ॐ

### ॥ दीप पूजाम् ॥ Worship of the lamp (Light the Lamps)

शुभं करोति कल्याणं आरोग्यं धन-सम्पदः ।
शत्रु बुद्धि विनाशाय दीप-ज्योतिः नमोऽस्तु ते ॥
दीपो ज्योतिः परं ब्रह्म दीपो ज्योतिः जनार्दनः ।
दीपो हरतु मे पापं सन्ध्या दीपं नमोऽस्तु ते ॥

(apply candana and ku~Nkuma)

ॐ दीप देवताभ्यो नमः । दिव्य गन्धन् धारयामि ॥

### ॥ गुरु प्रर्थानम् ॥ Prayer to the Guru (Namaskara Mudra)

ॐ गुरुर्ब्रह्मा गुरुर्विष्णु गुरुदेवो महेश्वरः ।
गुरुर्-सक्शत्-पारब्रह्म तस्मै श्री गुरवे नमः ॥
गुरवे सर्व-लोकानां भिषजे भव रोगिणाम् ।
निधये सर्व विद्यानां श्री दक्षीणा-मूर्तये नमः ॥

### ॥ गणपति प्रर्थानम् ॥ Prayer to Lord Ganapati (Tap the temples then do Namaskaara-mudra)

शुक्लाम्-बरधरं विष्णुं शशि-वर्णं चतुर्भुजम् ।

प्रसन्-नवदनं ध्यायेत् सर्वविघ्नो-पशान्तये ॥

॥ आसन विधिः ॥ Worship of the seat (with water, draw a dot and triangle; then namaskaara-mudra)

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।

त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

(be seated)

॥ आचमनीयं ॥ Sipping water (3x)

ॐ आत्म-तत्त्वाय स्वाहा ।

ॐ सत्व-तत्त्वाय स्वाहा ।

ॐ गुरु-तत्त्वाय स्वाहा ॥

॥ सङ्कल्पः ॥ Resolution to perform Puujaa (hold akShatas between hands and offer to Lord with "kariShye")

ॐ तत् सत् ॐ । ॐ ममो-पात्त । समस्त दुरित-क्शय-द्वार । श्री परमेश्वर प्रीत्यर्थं । श्री महा-गणेश्वर प्रीत्यर्थं ।

अस्यां शुभ-तिथौ । ॐ श्री गणना-थामृ-तानन्द प्रसाद सिद्ध्यर्थं । प्रसादेन सर्वा-रिष्ट शान्त्यर्थम् । भक्ति सिद्ध्यर्थम् । श्री गणना-थामृ-तानन्द स्वामी गुरु-पादुका पूजां करिष्ये ॥

(sprinkle water on devotees)

अप उपस्-प्रिश्य ।

स्वस्ति प्रजाभ्यः परि-पालयन्तां
न्यायेन मार्गेण महीं महीशाः -।
गोब्राह्मणेभ्यः शुभमस्तुनित्यं
लोकाः समस्ताः सुखिनो भवन्तु॥
ॐ शान्ति श्शान्ति शान्तिः॥
ॐ श्री गुरुभ्यो नमः। हरिः ॐ

यश्छन्दसा-मृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय। आवहन्ती वितन्वाना॥ कुर्वाणा चीरमात्मनः। वासाग्ं सि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा। आ मायन्तु ब्रह्म-चारिणः स्वाहा। वि माऽऽयन्तु ब्रह्म-चारिणः स्वाहा। प्र माऽऽयन्तु ब्रह्म-चारिणः स्वाहा। दमायन्तु ब्रह्म-चारिणः स्वाहा। शमायन्तु ब्रह्म-चारिणः स्वाहा॥ यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽसानि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा। तस्मिन् सहस्रशाखे॥ निभगाऽहं त्वयि मृजे स्वाहा। यथाऽऽपः प्रवताऽऽयन्ति। यथा मासा अहर्जरम्।

एवं मां ब्रह्मचारिणः। धात-रायन्तु सर्वतः स्वाहा। प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व॥

भूर्भुवः सुवो भूर्भुवः सुवो भूर्भुवः सुवः॥

॥ कलश पूजाम्॥ Worship of the Sacred Water-pot (apply candana & ku~Nkumam)

ॐ कलश देवताभ्यो नमः। दिव्य गन्धन् धारयामि॥

(keep right palm over water pot)

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति।

नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

(dhenu mudra)

ॐ अमृतं भवन्तु॥

॥ ध्यानम् (meditate on Guru's inner essence) ॥

ऐंकार ह्रींकार रहस्य युक्त

श्रींकार कूधार्थ महाविभूत्याः।

ॐकार मर्म प्रदिपानिभ्यां

नमो नमः श्री-गुरु-पादुकाभ्याम्॥

आज्ञान-नाशनाय विद्महे ज्ञान-प्रकषाय धीमहि।

तन्नो गुरु-पादुकाः प्रचोदयात्॥

तत्-दक्षिणाय विद्महे गुरु-मूर्तये धीमहि। तन्न-श्शिवः प्रचोदयात्॥

गणनाथाय विद्महे अमृतकाय धीमहि।

तन्नो धिशः प्रचोदयात् ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

ध्यानं ध्ययामि ॥

॥ आवाहनम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानसुः ।

परेण नाकं निहितं गुहायां विभ्राजदे-तद्-यतयो विशन्ति ॥

वेदान्त-विज्ञान सुनिश्चितार्थाः संन्यास योगाद्-यतय-शुद्ध-सत्त्वाः ।

ते ब्रह्म-लोके तु परान्त-काले परामृतात्-परिमुच्यन्ति सर्वे ॥

दह्रं विपापं परमेऽश्म भूतं यत्-पुण्डरीकं पुर-मध्य-सग्गस्थम् ।

तत्रापि दह्रं गगनं विशोकस्-तस्मिन् यद्-अन्तस्-तद्-उपासितव्यम् ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्टितः ।

तस्य प्रकृति-लीनस्य यः परः स महेश्वरः ॥

तत्-दक्षिणाय विद्महे गुरु-मूर्तये धीमहि । तन्न-श्शिवः प्रचोदयात् ॥

गणनाथाय विद्महे अमृतकाय धीमहि ।

तन्नो धिशः प्रचोदयात् ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

सत्गुरुं आवाहयमि स्थापयमि ॥

॥ आर्चनम् ॥

ॐ श्री गुरुभ्यो नमः। ॐ परम-गुरुभ्यो नमः।

ॐ परात्पर-गुरुभ्यो नमः। ॐ परमेष्टि-गुरुभ्यो नमः।

ॐ दक्षिणा-मूर्तये नमः।

ॐ वीणा-धर दक्षिणा-मूर्तये नमः।

ॐ योग दक्षिणा-मूर्तये नमः।

ॐ मेधा दक्षिणा-मूर्तये नमः।

ॐ ज्ञान दक्षिणा-मूर्तये नमः।

ॐ व्याख्यान दक्षिणा-मूर्तये नमः।

ॐ अपस्मार निवर्तक दक्षिणा-मूर्तये नमः।

ॐ श्रीमद्-प्रमहंस-गणना-थामृ-तानन्द स्वामिने नमः।

॥ चन्दनम् ॥ Sandal-wood (anoint the Lord with sandal-wood paste)

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।

ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः।

दिव्य परिमळ गन्धान् धारयामि।

॥ कुङ्कुमम् ॥ Red Powder (offer ku~Nkamam)

गन्ध-स्योपरि हरिद्रा-कुङ्कुमं समर्पयामि ।

॥ भस्मम् ॥ Sacred Ash (offer vibhuuti)

दिव्य परिमळ विभूतिं समर्पयामि ।

॥ पुष्पम् ॥ Flowers (offer red flowers)

पुष्पा-वतीः प्रसू-वतीः फलिनी-रफला उत ।

अश्वा इव सजित्वरीर्-विरुधः पारयिष्णवः ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

नान विध परिमळ पत्र-पुष्पं पूजयामि ।

तदु परि मङ्गलाक्षतान् समर्पयामि ।

॥ धूपम् ॥ Insence (ring bell and wave incese before the Lord in clock-wise circles)

ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् ।

धूर्वति तं धूर्वयं वयं धूर्वामस्त्वं ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

ॐ भूर् भुवः सुवः । धूपं आघ्रपयामि । (stop ringing bell & offer a spoon water)

धूपान्-अन्तरं आचमनीयं समर्पयामि । (offer akShatas)

मङ्गलाक्षतान् समर्पयामि ।

॥ महा-नैवेद्यम् ॥ Food offering

॥ नैवेद्य शुद्धिम् ॥ Purification of food (ring bell & with a spoon of water circle food three times in clock-wise circles)

ॐ भूर् भुवः सुवः । ॐ तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि । धीयो यो नः प्रचोदयात् ॥

(ring bell loud and sprinkle food)

देव सावित प्रसुव

॥ अमृतम् ॥ Turning food to Nectar (show dhenu mudra)

(say this if it is morning)

ॐ सत्यं त्वर्तेन परिश्ञ्चामि

(say this if it is evening)

ॐ ऋतं त्वा सत्येन परिशिञ्चामि

ॐ अमृतमस्तु । अमृतो-पस्तरण-मसि ॥

॥ पञ्च प्राणार्पनम् ॥ Offering of the Five Vital Breaths of the Food (Ring Bell. hold a flower or akShatas in mR^igi mudra and waft the Praanaas of the food toward the Lord 6 times with "swaahaa")

ॐ प्राणाय स्वाहा ।

ॐ अपानाय स्वाहा ।

ॐ व्यानाय स्वाहा ।

ॐ उदानाय स्वाहा ।

ॐ समानाय स्वाहा ।

ॐ ब्रह्मणे स्वाहा ॥

(keep ringing bell)

ॐ हा ३ वु हा ३ वु हा ३ वु । अहमन्न-महमन्न-महमन्नम् । अहमन्नादो २

ऽहमन्नादो २ ऽहमन्नादः । अहग्ग् श्लोककृ-दहग्ग् श्लोककृ-दहग्ग् श्लोककृत् ।

अहमस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३ भाइ । योमा ददाति

स इदेव मा ३ वाः । अह-मन्नमन्न-मदन्तमा ३ द्मि । अहं विश्वं भुवन-मभ्यभवं ।

सुवर्ण ज्योतीः । य एवं वेद ॥

अन्नपूर्णे सदापूर्णे शङ्कर-प्राण-वल्लभे ।

ज्ञान-वैराग्य-सिद्ध्यर्थं भिक्षां देहि च पार्वति ॥

माता च पार्वती देवी पिता देवो महेश्वरः ।

बान्धवाः शिव-भक्ताश्च स्वदेशो भुवन-त्रयम् ॥

शाल्यन्नं पायसं क्षीरं लड्डुकान् मोदका-नपि ।

गृहाण कृपया शिव फलानि सुब-हुनिच ॥

(offer flowers / akShatas at the Lord's feet)

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

ॐ भूर् भुवः सुवः ।

नाना विध महा-नैवेद्यं निवेदयामि । (namaskaara mudra)

यथा-शक्त्या समर्पित महा-नैवेद्यं कृपया स्वीकुरु ॥

॥ पनीयं ॥ Water (offer a spoon of water 5 times with "samarpayaami")

मध्ये मध्ये अमृत-पनीयम् समर्पयामि ।

अमृता-पिधअन-मसि ।

तम्बूलं निवेदयामि ॥

॥ दीपम् ॥ Ghee Lamp (ring bell and wave light in clock-wise circles before the Lord)

ॐ उद्दीप्यस्व जातवेदोऽपघ्निं निर्ऋतिं मम । पशुग्गश्च मह्यमावह जीवनं च दिशोदिश । मानोहिंग्ं सीज्जातवेदो गामश्वं पुरुषं जगतं । अबिभ्रदग्न आगहि श्रीया मा परिपातय ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

ॐ भूर् भुवः सुवः ।

दिव्य मङ्गल-दीपं सन्दर्शयामि । (stop ringing bell & offer a spoon of water)

दीपान्-अन्तरं आचमनीयं समर्पयामि । (offer akShatas)

मङ्गलाक्षतान् समर्पयामि ॥

॥ कपूर नीराज्जनम् ॥ Camphor Light (Ring bell and wave light before the Lord in clock-wise circles)

ॐ ईशानस्-सर्व-विद्यान-मीश्वरस्-सर्व-भूतानाम् ।

ब्रह्मा-धिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा-शिवोम् ॥

गणनाथाय विद्महे अमृतकाय धीमहि ।

तन्नो धिशः प्रचोदयात् ॥

राजाधिराजाय प्रसह्य साहिने ।

नमो वयं वैश्रवणाय कुर्महे ।

स मे कामान् काम कामाय मह्यं ।

कामेश्वरो वै श्रवणो ददतु ।

कुबेराय वै श्रवणाय ।

महाराजाय नमः ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

ॐ भूर् भुवः सुवः ।

कर्पूर नीराजनं सन्दर्शयामि ॥ (stop ringing bell and with a spoon of water circle the light three times with the following mantra.)

रक्ष रक्षां धारयामि ॥

(Now waft the light toward the Lord three times. Then recieve the aarati before offering it to all attending the puujaa)

॥ दक्षिणम् ॥ Offering Money

ॐ नमो हिरण्य-बहवे हिरण्य-वर्णाय हिरण्य-रूपाय हिरण्य-पतये ऽंबिका-पतये

उमा-पतये पशु-पतये नमो नमः ॥

सौवर्णं रजतं चैव निक्षिप्तं च तवा-ग्रथः ।

सुवर्ण-पुष्पं गणेश सर्व विघ्न हरो भव ॥

(offer money)

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

सुवर्ण-पुष्प दक्षिणं समर्पयामि ।

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

अनेक कोटि प्रदक्षिणा-नमस्कारान् समर्पयामि ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

समस्तो-पचारान् समर्पयामि ॥

ॐ श्री गणना-थामृ-तानन्द स्वामिने नमः ।

सत्गुरुं यथा-स्थानं प्रतिष्-ठापयामि ।

॥ समर्पनम् ॥ Offering of fruits of Worship to the Lord

त्वमेव माता च पिता त्वमेव ।

त्वमेव बन्धुश्च सखा त्वमेव ॥

त्वमेव विद्या द्रविणं त्वमेव ।

त्वमेव सर्वं मम देवदेव ॥

कायेन वाचा मनसेन्-द्रियैर्वा

बुद्ध्यात्-मना वा प्रक्रिति स्वभावात् ।

करोमि यद् यद् सकलं परस्मै

विनायकायेति समर्पयामि ॥

अनेन ध्यानेन श्री दक्षिणा-मूर्तिः प्रीयतां ॥

॥ शान्ति पाठ ॥ Prayer for Peace

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु ।
मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्-पूर्णमुदच्युते ।
पूर्णस्य पूर्णमादाय पूर्णमे-वावशिष्यते ॥
ॐ शान्तिः शान्तिः शन्तिः ॥

ॐ असतो मा सत् गमया ।
तमसो मा ज्योतिर् गमया ।
मृत्योर् मा अमृतं गमया ।
ॐ शान्तिः शान्तिः शन्तिः ॥

॥ अर्पणम् ॥ Offering ourselves to the Lord

ॐ तत् सत् ॐ । श्री दक्षिणा-मूर्त्यार्-पनमस्तु ॥